दिनांक 13-6-21 उपशास्त्री द्वितीय वर्ष, विषय-व्याकरण
ग्रन्थ-सिद्धान्तकौमुदी, अदादि प्रकरणम्

1 दोग्धि - दुह् धातोर्लट् लटस्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। तिङ्शित् सार्वधातुकम् इति सार्वधातुक संज्ञायाम्, कर्तरि शप् इति शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्। दादेर्धातोर्घः इति सूत्रेण हकारस्य स्थाने घकारादेशे, दुघ् ति इति जाते, झलां जशोऽन्ते इति सूत्रेण जश्त्वे झषस्तथोर्धोऽधः इति सूत्रे तकारस्य स्थाने धकारादेशे। सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इति गुणे दोग्धि इति सिद्धम्। एवं प्रकारेण दुग्धः रूपं भवति

2 दुग्धः - दोग्धिवत्। अन्ते तस् सकारस्य रुत्वे विसर्गे।

3 धोक्षि - दुह् धातोर्लट् - लट् स्थाने तिप्तस्झि इति सूत्रेण सिप् प्रत्यये, झोऽन्तः इति अन्तादेशे तिङ्शित् -- इति सूत्रेण सार्वधातुकसंज्ञायाम्, कर्तरि शप् इति शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्। दादेर्धातोर्घः इति सूत्रेण हकारस्य स्थाने घकारादेशे। एकाचो बशो भष् झषन्तस्य स्ध्वोः ~~…~~ इति सूत्रेण भष्भावे दकारस्य स्थाने धकारः धुघ् सि इति जाते। झलां जशोऽन्ते इति सूत्रेण घकारस्य स्थाने जश्त्वे गकारः खरि च इति सूत्रेण चर्त्वे, आदेशप्रत्यययोः सूत्रेण सकारस्य स्थाने मूर्धन्यादेशे षकारः, ककार षकार मिलित्वा क्षकारः धोक्षि इति सिद्धम्।

सिप्

4 दुग्धे - दुह् धातोर्लट् लटस्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये। तिङ्शित्सार्वधातुकम् इति सार्वधातुक संज्ञायां, शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्, दादेर्धातोर्घः इति सूत्रेण हकारस्य स्थाने घकारादेशे। घकारस्य स्थाने जश्त्वे गकारः, झषस्तथोर्धोऽधः इति तकारस्य स्थाने धकारादेशे, दुग्धे इति सिद्धम्

अमरनाथ मिश्र
एम० प्रो० व्याकरण
रा० उ० सं० म० वि०
सुलसिगा पूर्णिया

दिनांक 23-6-24

उपशास्त्री प्रथम वर्ष, विषय व्याकरण
ग्रन्थ सिद्धान्त कौमुदी, तद्धित प्रकरणम्

1 षाण्मातुरः — षण्णां मातॄणामपत्यम् इति विग्रहे मातुरुत् संख्यासंभद्रपूर्वायाः इति सूत्रेण अण् प्रत्यये, अनुबन्ध लोपे उदोष्ठ्यपूर्वस्य इति सूत्रेण ऋकारस्य स्थाने उत्व रपरत्वे षाण्मातुर् अ इति जाते प्रातिपदिक संज्ञायाम्, विभक्ति कार्ये।

2 कानीनः — कन्यायाः अपत्यं पुमान् - इति विग्रहे कन्यायाः कनिन च इति सूत्रेण अण् प्रत्यये त कन्यास्थाने कनीनादेशे कृते। प्रातिपदिकसंज्ञायाम् विभक्तिकार्ये कानीनः (कर्णः, व्यासश्च)

3 वैनतेयः — विनताया अपत्यम् पुमान् इति विग्रहे स्त्रीभ्यो ढक् इति सूत्रेण ढक् प्रत्यये, अनुबन्ध लोपे, किति च इति वृद्धौ, आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् इति सूत्रेण ढकारस्य स्थाने एय् आदेशे कृते, वैनतेय् इति दशायाम् प्रातिपदिकसंज्ञायां विभक्ति कार्ये।

4 राजन्यः — क्षत्रिय जातिः अत्र राज्ञो जाता वेव इति वाच्यम् इति वार्तिकनिर्देशात् राजा - श्वशुराद् यत् इति सूत्रेण यत् प्रत्यये अनुबन्ध लोपे। नस्तद्धिते इति सूत्रेण टिलोपे प्राप्ते तं प्रबाध्य ये चाभावकर्मणोः इति सूत्रेण प्रकृति भावे कृते राजन्य इति जाते प्रातिपदिकसंज्ञायां विभक्ति कार्ये।

5 श्वशुर्यः - श्वशुरस्यापत्यं पुमान् इति विग्रहे राजाश्वशुराद् यत् इति सूत्रेण यत् प्रत्यये अनुबन्ध लोपे, विभक्ति कार्ये।

6 राजानः — राज्ञोऽपत्यम् पुमान् इति विग्रहे राजा- श्वशुराद् यत् इति सूत्रेण यत् प्रत्यये अनुबन्ध लोपे। नस्तद्धिते इति सूत्रेण टिलोपे प्राप्ते तं प्रबाध्य अन् इति सूत्रेण प्रकृतिभावे कृते, प्रातिपदिकसंज्ञायाम् विभक्ति कार्ये।

अमरनाथ मिश्र
स० प्रा० व्याकरण
रा० उ० सं० म० वि०
तुलसीना पूर्णिया

दिनाङ्क 13-6-21 शास्त्री प्रथम खण्ड। विषय- अनि० व्याकरण
ग्रन्थ- लघुसिद्धान्त कौमुदी, समासप्रकरणम्

1 वाक्त्वचम् - वाक् च त्वक् च समाहारः इति विग्रहे चार्थे द्वन्द्वः इति सूत्रेण समासे कृते। समासत्वात् प्रातिपदिक संज्ञायाम् सुपो धातु इति सूत्रेण सुब्लुक्। द्वन्द्वात् चुदषहान्तात् समाहारे इति सूत्रेण समासान्त टच् प्रत्यये अनुबन्ध लोपे। चोः कुः इति सूत्रेण कुत्वे। प्रातिपदिक संज्ञायां विभक्ति कार्ये।

2 शमीदृषदम् - शमी च दृषद् च तयोः समाहारः इति विग्रहे चार्थे द्वन्द्वः इति समासे। समासत्वात् प्रातिपदिक संज्ञायाम् विभक्ति कार्ये।

3 अर्धर्चः - अर्धम् ऋचः - इति विग्रहे अर्धं नपुंसकम् इति सूत्रेण समासे, समासत्वात् प्रातिपदिक संज्ञायाम् सुब्लुक्। ऋक्पूरब्धूःपथामानक्षे इति सूत्रेण समासान्त अ प्रत्यये। अर्धर्चादयः पुंसि इति पुल्लिङ्गः ~~शेषं~~ प्रातिपदिक संज्ञायां विभक्ति कार्ये।

4 विष्णुपुरम् - विष्णोः पुः इति विग्रहे षष्ठी इति सूत्रेण समासे कृते। प्रातिपदिक संज्ञायां, सुब्लुक्। ऋक्पूरब्धूःपथामानक्षे इति सूत्रेण समासान्त अ प्रत्यये। नगरवाचकत्वात् नपुंसकलिङ्गः।

5 राजधुरा - राज्ञो धूः - अत षष्ठी इति सूत्रेण समासे तथा ऋक्पूरब्धूःपथामानक्षे इति सूत्रेण समासान्त अ प्रत्यये। प्रातिपदिक संज्ञायाम् विभक्ति कार्ये।

6 सखिपथः - सख्युः पन्था इति विग्रहे षष्ठी इति सूत्रेण समासे। ऋक्पूरब्धूःपथामानक्षे इति सूत्रेण समासान्त अ प्रत्यये। भस्य टेर्लोपः इति टि लोपे विभक्ति कार्ये।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
[illegible]